
# ६. जागृहि त्वं भारतीय !

## पठन्तु, विचिन्त्य वदन्तु



**प्रश्नाः ?**

1. चित्रे के के दृश्यन्ते ?
2. ते किं कृतवन्तः?
3. इदानीमपि एतान् स्मरामः किमर्थम् ?

## उद्देश्यम्

★ भारतदेशे विद्यमानस्य प्रकृतिसौन्दर्यस्य आस्वादनम् ।

★ लोकं चैतन्यपथे चालयितुं संस्कृतज्ञाय तदीयोत्तरदायित्वज्ञापनम् ।

© SCERT not to be republished

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।

२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।

३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगाहनम् अभिवर्धयन्तु ।



जागृहि त्वं भारतीय ! प्रभातं समुपस्थितम् ।
संस्कृतज्ञ ! प्रयामश्चल ! वयं राष्ट्रे जागृयाम ।
वयं राष्ट्रे जागृयाम || जागृहि ||

बाल-पिक-कुल-मधुर-संस्कृत-पञ्चम-स्वर-कूजितम्
शृणु श्रवण-सुखप्रदं कवि-सुभाषित-कल-किलकिलम् ।
पश्य विश्वहितास्पदं त्यागारुणं कल्यागतम्
ज्ञानभानुमुपास्महे धियो यो नः प्रेरयेत् ।
धियो यो नः प्रेरयेत् || जागृहि ||



विसृज जाड्यं मोहजनितं त्यजालस्यं मानसम्
श्रुति-स्मृति-ऋषि-शङ्खनादैर्दमय मन्देहासुरान् ।
चिन्तयानन्तं समन्तात् सर्वजीवान्तर्गतं
भारतीसुप्रजाः ! कार्यं मातृसेवनमाह्निकम् ।
मातृसेवनमाह्निकम् || जागृहि ||



मनः क्षेत्रं समं कृत्वा स्नेहलतिका रोप्यताम्
दयासलिलं पूरयित्वा प्रेमपुष्पं वर्ध्यताम् ।
संविभज्य ज्ञानसुफलं समैः सह सम्भुज्यताम्
मुनिवचनकृतिशान्तिधृतिभिः भारतश्रीः साध्यताम् ||
भारतश्रीः साध्यताम् || जागृहि ||

©SCERT to be republished

## गीतस्य सारांशः

हे भारतीय ! त्वं भारतीयसंस्कृतौ जागरूको भव । कुसंस्कृतिभ्यः प्रबोद्धुम् एषः एव सुसमयः । हे संस्कृतज्ञ ! आगच्छ । वयं देशीयान् जनान् जागरयामः।

बालाः पिकाः इव मधुराणि संस्कृतगीतानि गायन्ति । तानि पञ्चमस्वरमिव शृणुमः। कवीनां सुभाषितानि अपि प्रबोधयन्ति आनन्देन शृणुमः। त्यागरूपमरुणं परिशीलयन्तः ज्ञानसूर्यमाराधयामः।

लौकिकव्यामोहानां कारणतः आस्मासु स्थितं शारीरिकं जडत्वं, मानसिकम् अज्ञानं च त्यक्त्वा वयं संस्कृतिविषये जागृयाम । सर्वप्राणिषु स्थितमन्तर्यामिनम् एकमेव ज्ञास्यामः। तदा अज्ञानतः मानवेषु स्थिताः भेदाः नश्यन्ति । तेन वयं सर्वे भारत्याः ऐकमत्येन सुपुत्राः सन्तः मातृसेवनम् नित्यकार्यं कर्तुं शक्नुमः।

सर्वैः सम्भूय कार्यकरणाय मनसि सर्वे समानाः इति भावनां स्वीकुर्मः चेत् दया, प्रेम इत्यादिसद्गुणाः जायन्ते । तदा वयं सर्वे मिलित्वा भारतीयवैज्ञानिकवाङ्मयम् अध्येतुं शक्नुमः । तद्विषये महर्षीणां वचनानि, रचनाः, चरितानि अस्माकं मार्गदर्शकानि भवन्ति । तेषामुपयोगेन वयं शान्तिं धैर्यं च सम्पाद्य भारतमातुः घनवैभवं सम्पादयामः।

## विशेषांशाः

गीते सर्वत्र अवधारणापूर्वपदकर्मधारयस्य प्रयोगः विशेषार्थं बोधयति ।

**पञ्चमस्वरः** - स,रि,ग,म,प,द,नि इति सप्तस्वरेषु 'प' इत्यस्य पञ्चमस्वरः इति व्यवहारः। ''पिकः कूजति पञ्चमम्'' इति कोकिलस्य कूजितं पञ्चमस्वरः इति व्यवह्रियते ।

**मन्देहासुराः** - मन्देहाः इति असुराः । मन्देहनामकाः राक्षसाः उदयसमये सूर्यं पीडयन्ति । गायत्रीमन्त्रोच्चारणपूर्वकं सूर्याय अर्घ्यप्रदानं कुर्मः चेत् मन्त्रपूतं तज्जलमेव मन्देहानां विषये ब्रह्मास्त्रं भवति । तदा ते सूर्यं विहाय गच्छन्तीति पौराणिकी कथा ।

**आह्निकम्** - अहनि अहनि कर्तव्यं कर्म । सन्ध्यावन्दनादिकम् आह्निकं कर्म । (प्रतिदिनं करणीयम् । न कुर्मः चेत् प्रत्यवायः (पापं) भवति ।)

© SCERT not to be republished

## एतानि कुर्वन्तु

### I. भावावगाहनम् - प्रतिस्पन्दनम्

**अ. अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. ''वयं राष्ट्रे जागृयाम'' इति कविः किमर्थं गायति ?

२. सूर्यः कथं सर्वान् प्रेरयति ? ज्ञानं कथं सर्वान् प्रेरयति ?

३. जाड्यम्, आलस्यं त्यजामः चेत् किं भवति ?

४. ''चिन्तयानन्तं समन्तात् सर्वजीवान्तर्गतम्'' इति कविः गायति । सर्वजीवान्तर्गतम् अनन्तं कथं चिन्तयामः ?

**आ. गीते विद्यमानानि क्रियापदानि एकत्र लिखित्वा तेषामर्थानवगच्छन्तु ।**

**इ. अधः दत्तानि वाक्यानि पठन्तु । तेषां समानार्थकानि वाक्यानि गीतात् चित्वा लिखन्तु ।**

१. लोकं प्रविशन्तं त्यागरूपम् अरुणं पश्यतु ।

२. अस्माकं मतिप्रेरकं ज्ञानसूर्यं सेवामहे ।

३. भवान् अज्ञानतः जातं जाड्यं त्यजतु आलस्यं च विसृजतु ।

४. भरतमातुः सुपुत्र ! भवता जननीसेवा इति नित्यकार्यम् आचरणीयम् ।

५. ज्ञानफलं विभज्य सर्वैः जनैः सह खादन्तु ।

**ई. अधः दत्तं परिच्छेदं पठन्तु । कदा, किं, कुत्र, का, इत्यादिप्रश्नवाचकान् उपयुज्य प्रश्नान् निर्मान्तु ।**

योगाचार्यः वेङ्कटेश्वरः शिष्यान् एवं वदति । प्रतिदिनं (प्रातः) योगाभ्यासः करणीयः । आचार्यस्य सविधे शिक्षणं विना आसनानि न करणीयानि । एकैकम् आसनम् एकैकस्मिन् अवयवे प्रभावं जनयति । योगस्य आचरणेन शरीरगतं मालिन्यं स्वेदरूपेण गच्छति । शरीरस्य स्वास्थ्यसिद्धिः भवति ।

**उ. पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. 'कस्मिन् जागृयाम' इति गीते उक्तमस्ति ?

२. 'धियो यो नः प्रेरयेत्' इति गीते केषु विषयेषु उक्तमस्ति ।

३. 'मातृसेवनमाह्निकम्' इति गीते कस्मिन् सन्दर्भे उक्तम् ।

४. 'भारतश्रीः साध्यताम्' इति केषु अंशेषु उक्तम् ?

© SCERT not to be republished

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. प्रतिदिनं जनाः स्वयमेव निद्रातः जागरणं प्राप्नुवन्ति । किन्तु कविः ''वयं राष्ट्रे जागृयाम'' इति वदति । तस्य भावः कः ?

२. मातृसेवनं नाम नित्यं किं किं कर्तुं शक्यते ?

३. सर्वेषां कृते ज्ञानस्य वितरणेन किं प्रयोजनम् ?

४. ''स्नेहः - दया - प्रेम'' इत्यादिभावैः एकतानिर्माणं कथं साध्यं भवति ?

५. कीदृशं कार्यं विश्वहितास्पदं भवितुमर्हति ?

### आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. ''मुनिवचन-कृति-शान्ति-धृतिभिः भारतश्रीः साध्यताम्'' इत्यनेन भारतदेशस्य वैभवप्राप्तये मुनीनां चरितानि कथमुपकुर्वन्ति ? इति निरूपयन्तु ।

२. गीतस्य सारांशं स्वीयवाक्यैः लिखन्तु ।

### इ. सर्जनात्मकतया समाधानानि लिखन्तु ।

१. अधः दत्तानि ध्येयवाक्यानि पठित्वा तादृशानि निर्मान्तु ।

**''स्नेहलतिका रोप्यताम् - भारतश्रीः साध्यताम् ।''**

**''आर्षवाङ्मयं पठामः - देशसंस्कृतिमाचरामः ।''**

२. अधः धत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

ప్రఖ్యాతి చెందిన శ్రీ మల్లికార్జునస్వామి దేవాలయం శ్రీశైలంలో ఉంది. భారతదేశంలోని ద్వాదశ జ్యోతిర్లింగాలలోని ఒక ప్రధానలింగము ఇక్కడ వెలసి ఉన్నది. భ్రమరాంబాసహిత శ్రీ మల్లికార్జునస్వామికి ప్రతిసంవత్సరం శివరాత్రి రోజున ఉత్సవం జరుగుతుంది. భ్రమరాంబాదేవి అష్టాదశశక్తిపీఠాధిదేవతలలో ఒక దేవత.

### ई. प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।

कविः ऐकमत्येन मातृसेवनमाह्निकमिति उक्तवान् । भवन्तः ऐकमत्येन भारतमातृसेवनं कथं कुर्वन्ति ?

©SCERT not to be republished

## III. भाषांशाः

### 1. पदजालाभिवृद्धिः

**अ. मञ्जूषातः योग्यं पदं चित्वा रिक्तस्थानानि पूरयन्तु ।**

| | | | |
|---|---|---|---|
| बालगङ्गाधरतिलकः | लोकमान्यः | बर्मा | रत्नगिरिः |
| गणितशास्त्रे | स्मरन्तः | स्वराज्य | गीतारहस्यम् |
| ज्योतिषशास्त्रे | पश्चिम | अधिकारः | बद्धः |

भारतदेशस्य ................दिग्भागे मुम्बायिनगरम् अस्ति । मुम्बायिनगरस्य समीपे ............ नाम नगरम् अस्ति । तत्र रामचन्द्रतिलकः नामकः .............. ..............च पण्डितः आसीत् । तस्य पुत्रः .............. । बालगङ्गाधरतिलकः .............. सम्पादनं मम जन्मसिद्धः ............. इति घोषितवान् । सः ............ देशे माण्डले नामके कारागारे आङ्ग्लेयैः ........... आसीत् । तिलकः ................इति ग्रन्थं लिखितवान् । तस्य त्यागनिरतिं ........... भारतीयाः तं सगौरवं ................. इति बिरुदेन सम्मानितवन्तः ।

**आ. कोष्ठकद्वयतः समानार्थकपदानि चित्वा एकत्र लिखन्तु । तानि उपयुज्य वाक्यानि लिखन्तु ।**

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| प्रयामः | राष्ट्रे | पिकः | विसृज | कलय | सलिलम् | धियः | श्रीः |
| कोकिलः | त्यज | चलामः | परिशीलय | उदकम् | देशे | मतीः | कान्तिः |

**उदा** - प्रयामः = चलामः - वयं अभिवृद्धिमार्गे प्रयामः।

### 2. व्याकरणांशाः

**अ. अधः दत्तान् समासान् दत्तानि विग्रहवाक्यानि च पठित्वा अवगच्छन्तु ।**

| **समासाः** | **विग्रहवाक्यानि** |
|---|---|
| १. बालपिकाः | बालाः एव पिकाः। |
| २. त्यागारुणम् | त्यागः एव अरुणः । तं त्यागारूणम् । |
| ३. मनः क्षेत्रम् | मनः एव क्षेत्रम् । मनःक्षेत्रम् । तत् । |

**उपरितनसमस्तपदानि अवधारणापूर्वपदकर्मधारयसमासस्य उदाहरणानि ।**

आ) उपरितनानि उदाहरणानि अनुसृत्य अधः दत्तानां समस्तपदानां विग्रहवाक्यानि लिखन्तु ।

१. दयासलिलम् -

२. ज्ञानभानुम् -

३. स्नेहलतिकाम् -

इ) योग्यं विग्रहवाक्यं ज्ञात्वा रेखाङ्कनं कुर्वन्तु ।

१. मातृसेवनम्

क) मात्रा सेवनम् ख) मातरि सेवनम् ग) मातुः सेवनम्

२. भारतीसुप्रजाः

क) भारत्याः सुप्रजाः ख) भारत्या सुप्रजाः ग) भारत्यै सुप्रजाः

३. भारतश्रीः

क) भारतमेव श्रीः ख) भारते श्रीः ग) भारतस्य श्रीः

४. विश्वहितम्

क) विश्वस्य हितम् ख) विश्वाय हितम् ग) विश्वे हितम्

५. शङ्खनादैः

क) शङ्खस्य नादैः ख) शङ्खयोः नादैः ग) शङ्खानां नादैः

६. मुनिवचनानि

क) मुनीनां वचनानि ख) मुनिषु वचनानि ग) मुनिभ्यः वचनानि ।

ई) पठन्तु - अवगच्छन्तु

**अपि लाक्षारसासिक्तं रक्तं त्वच्चरणद्वयम् ।**

अत्र चरणद्वयम् लाक्षारसलेपनरहितमपि रक्तिमं जातम् ।

**विवरणम्** - यत्र कारणं विना कार्यस्य उत्पत्तिः वर्ण्यते तत्र **विभावनालङ्कारः** भवति ।

**लक्षणम्** - **विभावना विनापि स्यात् कारणं कार्यजन्म चेत् ।**

© SCERT not to be republished

आ) अधः दत्तस्य वाक्यस्य दत्तान् प्रश्नान् आधारीकृत्य अलङ्कारनिरूपणं कुर्वन्तु ।

**शङ्खाद्वीणानिनादोऽयमुदेति महदद्भुतम् ।**

१. कस्मात् वीणानिनादः उदेति ?

२. शङ्खात् वीणानिनादः कथमस्ति ?

३. वीणायाः के च स्वराः श्रूयन्ते ?

४. शङ्खात् वीणानिनादः उदेति वा ?

५. अस्मिन् उदाहरणवाक्ये कारणम् अस्ति वा ?

६. अस्मिन् उदाहरणवाक्ये कार्यं किम् ?

७. कार्यकारणयोः सम्बन्धः अस्ति वा ?

८. अयं कः अलङ्कारः ?

९. विभावनालङ्कारे के के अंशाः विद्यन्ते ?

ई) अधः दत्तस्य वाक्यस्य अलङ्कारनिरूपणं कुर्वन्तु ।

**"विनाऽपि मण्डनं देव्याः मुखं संशोभते भृशम् ।"**

© SCERT not to be republished

## परियोजनाकार्यम्

1. गीतसमुच्चयं पठित्वा एतादृशप्रेरणात्मकानि अन्यानि गीतानि चित्वा भित्तिपत्रे लिखित्वा प्रदर्शयन्तु, गायन्तु ।

(अथवा)

2. "भेदभावान् विहाय सर्वैः सह जीवनम्" इति विषये कथां, घटनां वा सङ्कलय्य कक्ष्यायां श्रावयन्तु ।

अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम् ।